श्री सच्चिदानन्द मूर्त्तये परमात्मने नमः

सन्ध्योपासनादिपञ्चमहायज्ञविधिः

प्रथम संस्करण

वेदविहिताचारधर्म्मनिरूपक श्रीमद्दयानंद

सरस्वती स्वामि विरचितेन भाष्येनानुगतः

वेदमतानुयायी राजा जयकृष्णदासाज्ञया लक्ष्मणपुरस्थ

मुंशी नवलकिशोर यंत्रे मुद्रितः

विक्रमादित्यराज्यतो गताब्दाः १९३९

जूलाई सन् १८८२ ई०

पुस्तक संख्या ५००० प्रति पुस्तक मूल्यम् ७)

श्रीगणेशायनमः ॥

अथ संध्योपासनादि

पंचमहायज्ञविधिर्लिख्यते ॥

तत्रस्थमंत्रादीनामर्थश्च लिख्यते संध्यायन्तिसम्यीयते परंब्रह्मयस्यांसा "संध्या"। तत्ररात्रिदिवसयोरुभयोस्संध्ययोः सर्वैर्मनुष्यैरवश्यम्परमेश्वरस्यैवस्तुतिप्रार्थनोपासनाः कार्य्याः ॥ आदौशरीरशुद्धिःकर्त्तव्याबाह्यादिजलादिना ॥ अभ्यान्तराशगद्वेषाः सत्यादित्यागेन "अद्भिर्गात्राणिशुध्यन्तिमनःसत्येनशुध्यति। विद्यातपोभ्यां भूतात्मा बुद्धिर्ज्ञानेनशुध्यति" इत्याहमनुः ॥ शरीरशुद्धेस्सकाशादात्मान्तःकरणशुद्धिरवश्यंसर्वैस्सम्पादनीयातस्यास्सर्वोत्कृष्टत्वा त्परब्रह्मप्राप्त्येक साधनत्वाच्च॥ ततोदर्भैर्हस्तेनवामार्ज्जनं । कुर्य्यात् ॥ पुनर्मंत्रकांस्त्रीन् प्राणायामान्कुर्य्यात् ॥ आभ्यन्तरस्थंवायुं नासिकापुटाभ्याम्बलेन वहिर्न्निःसार्य्य यथाशक्तिबहिरेवस्तम्भयेत् पुनःशनैश्शनैर्गृहीत्वा किंचित्तमवरुध्यपुनस्तथैव बहिर्न्निस्सारयेदवरोधयेच्चैवं त्रिवारं न्यूनातिन्यूनं कुर्य्यादनेनात्ममनसोः स्थितिं सम्पादयेत् प्रच्छर्दन विधारणाभ्यांवा प्राणस्येति योगसूत्र प्रामाण्यात् ॥ ततोगायत्री मंत्रेण शिखाम्बद्ध्वारक्षां कुर्य्यात् ॥

अथाचमन मंत्रः ॥

"ओं शन्नोदेवी रभिष्टये आपोभवन्तुपीतये, शंयोर-भिस्रवन्तुनः" ॥ शंनः । देवीः । अभिष्टये । आपः । भवन्तु । पीतये । शंयोः । अभिस्रवन्तु । नः । आप्लृव्याप्तौ । अस्माद्धातोरप्शब्दः सिध्यति । दिवुक्रीड़ाद्यर्थः अप्शब्दो नियत स्त्रीलिंगो बहुवचनान्तश्च । देव्यआपः । सर्वप्रकाशकस्सर्वानन्दप्रदस्सर्वव्यापक ईश्वरः "अभिष्टये" इष्टानन्द प्राप्तये "पीतये" पूर्णानन्दावाप्तये "नो" अस्मभ्यं "शं" कल्याणं "भवन्तु" भावयंतु प्रयच्छंतु । इतियावत् ता आपोदेव्यःसएवेश्वरः । "नः" अस्माकमुपरि "शंयोः" शं "अभिस्रवन्तु" सुखस्य अभितः सर्वतोवृष्टिं करोतु ॥ एव मीश्वरं अनेन मंत्रेण प्रार्थयित्वा त्रिराचमेत् ॥

अथेन्द्रियस्पर्श मंत्राः ॥

ओं वाक्, वाक् । ओं प्राणः, प्राणः । ओं चक्षुश्चक्षुः । ओं श्रोत्रम् श्रोत्रम् । ओंनाभिः । ओंहृदयम् । ओंकंठः । ओं शिरः । ओंबाहुभ्यां यशोबलम् । ओंकरतलकर पृष्ठ" । इति सर्वत्रेश्वर प्रार्थनया स्पर्शः । कार्य्यः ॥

अथेश्वर प्रार्थना पूर्वक मार्ज्जन मन्त्राः ॥

ओं भूः पुनातु शिरसि । ओंभुवः पुनातुनेत्रयोः । ओंस्वः पुनातुकंठे । ओंमहः पुनातुहृदये । ओंजनः पुनातुनाभ्याम् ओंतपः पुनातुपादयोः । ओंसत्यम्पुनातु पुनश्शिरसि । ओं खंब्रह्म पुनातुसर्वत्र । ओमित्यस्य भूर्भुवःस्वरित्येतासांचार्था गायत्रीमंत्रार्थेद्रष्टव्याः ॥ "मह" र्नाम सर्वेभ्योमहान् सर्वैःपूज्यश्च । सर्वेषांजनकत्वा "ज्जनः" परमेश्वरः । दुष्टा-

नां सन्तापकारकत्वात् स्वयंज्ञानस्वरूपत्वात्। "यस्य ज्ञानमयन्तपः॥ इतिश्रुतेश्च। "तपः" ईश्वरः। अविनाशि यस्यकदाचिद्विनाशो नभवेत्तत्सत्यम्ब्रह्म"इतीश्वरनामभिर्मार्ज्जनंकुर्य्यात्॥

अथ प्राणायाम मंत्रः॥

ओंभूः। ओंभुवः। ओंस्वः। ओंमहः। ओं जनः। ओंतपः। ओंसत्यम्। इतिप्राणायाम मंत्रः॥

अथेश्वरस्य जगदुत्पादन द्वारा स्तुत्याघमर्षण मंत्रः॥

पापदूरी करणार्थः॥ ओंऋतंच सत्यञ्चाभीद्धात्तपसोध्यजायत ततोरात्र्यजायत ततः समुद्रोअर्णवः समुद्रादर्णवादधिसम्वत्सरोअजायत। अहोरात्राणि विदधद्विश्वस्य मिषतोवशी सूर्य्याचन्द्रमसौधाता यथापूर्व्वमकल्पयत्। दिवञ्चपृथिवीञ्चान्तरिक्षमथोस्वः॥ ऋतम्। च। सत्यम्। च। अभि इद्धात। तपसः। अधि। अजायत। ततः। रात्री। अजायत। ततः। समुद्रः। अर्णवः। समुद्रात्। अर्णवात्। अधि। सम्वत्सरः। अजायत। अहोरात्राणि। विदधत्। विश्वस्य। मिषतः। वशी। सूर्य्या। चन्द्रमसौ। धाता। यथापूर्व्वम्। अकल्पयत्। दिवम्। च। पृथिवीं। च। अन्तरिक्षं। अथो। स्वः। दधाति सकल जगत् पोषयति वास "धाते" श्वरो "वशी"वशंकर्तु शीलमस्यासः "यथा पूर्वं" यथा तस्यसर्वज्ञे विज्ञाने जगद्रचन ज्ञानमासीत् पूर्वकल्प सृष्टौ रचनं जगतो यथासीत् तथैव "सूर्य्याचन्द्रमसौ" प्रत्यक्ष विषयौ सूर्य चन्द्रलोकौ "दिवम्" सर्वोत्तमं स्वर्गलोकं "पृथिवीम् प्रत्यक्ष विषयां अन्तरिक्षं" द्वयोर्मध्यमाकाशं तत्र-

स्थाम् लोकांश्च "स्वः" मध्यस्य "स्वर्गलोकं" "अकल्पयत्" रचितवान्। ईश्वरज्ञानस्या परिणामित्वात् पूर्णत्वादनन्तत्वाच्च सर्वदा सर्वदैकरसत्वात्तस्यवृद्धि क्षयौ व्यभिचारश्च कदाचिन्नभवति अतएव "यथा" पूर्वकल्पयदित्युक्तम् ॥ सएव "वशी" ईश्वरः विश्वस्य मिषतः" सहज स्वभावेन "अहोरात्राणि" रात्रेर्दिवसस्यच बिभागं यथापूर्वं "बिदधत्" बिधानं कृतवान्। तस्यधातुवशिनःपरमेश्वरस्य "अभीद्धात्" अभितः सर्वतः दीप्तात् ज्ञानमयात् "तपसः" अनन्तसामर्थ्यात् "ऋतम्" नाम यथार्थं सर्व विद्याधिकरणं वेदशास्त्रम् "सत्यम्" त्रिगुण प्रकृत्यात्मक मव्यक्तम्। स्थूलस्य सूक्ष्मस्य जगतः कारणंचा "ध्यजायत" यथा पूर्वमुत्पन्नम्। "ततः" तस्मादेव सामर्थ्यात्। "रात्री" अन्धकार भूताया प्रलयानन्तरम्भवति सा "अध्यजायत" नामयथा पूर्वमुत्पन्ना "तम आसीत्तमसागूढ़ मग्रे" इतिश्रुतेः ॥ अग्रेसृष्टेःप्राक्तमोन्धकार एवासीत् तेन तमसा सकलं जगदिदमुत्पत्तेः प्राक्गूढ़ं गुप्तमदृश्यमासीत् । ततः तस्माद्देवसामर्थ्यात् । पृथिवीस्थोन्तरिक्षस्थश्च महान्समुद्रः "समुद्रोध्यजायत" यथापूर्वमुत्पन्नः। समुद्रादर्णवात् पश्चात्सम्वत्सरः क्षणादि लक्षणः कालः "अध्यजायत" यथा पूर्व मुत्पन्नः। यावज्जगत्तावत्सर्वं परमेश्वरस्य सामर्थ्यादेवोत्पन्न मित्यवधार्य्यम्। एवं सर्वजगदुत्पादकात्सर्वज्ञादीश्वराद्भीत्वा पापाद्दूरेसर्व जनैः स्थातव्यम्। कदाचित्केनचित् स्वल्पमपिपापंनैव कर्त्तव्यमितीश्वराज्ञास्तीति निश्चेतव्यम् अनेनाघमर्षणं

कुर्य्यात्। शन्नोदेवी रिति पुनराचमेत्॥ ततः सूर्योदयात् प्राक्तिष्ठन्सन् अर्थ विचार पूर्विकाङ्गायत्रींजपेत् ॥ पुनः सूर्य्योदयेसति परमेश्वरेणैव सूर्य्यादिकं सकलंजगद्र-चितमिति परमार्थ स्वरूपं ब्रह्मचिन्तयित्वा गायत्रीमंत्रेणार्घत्रयं सूर्य्याभिमुखंप्रक्षिप्य परंब्रह्मप्रार्थयेत्॥

अथ परिक्रमण मंत्राः॥

"ओं भृगवेनमः"शुद्धस्वरूपाय ॥ "ओ मिन्द्राय नमः" परमैश्वर्य्यवते यस्मादधिकन्तुल्यंवा कस्याप्यै-श्वर्य्यं नास्तीति। "ओ मगस्तयेनमः" निरुपद्रवाय पाप नाशकाय निष्पापायच॥ "ओं यमायनमः" सर्वेषाम्पाप पुण्य कर्त्तॄणां जीवानां पक्षपातं विहाय न्यायकारिणे व्यवस्थाकर्त्रे प्रशास्त्रेच। "ओं सारस्वतायनमः।" अनन्तविद्या विज्ञानाय सर्वविद्योत्पादकायच। "ओं वरुणायनमः"कर्तुमर्हायवरायोत्कृष्टाय बरप्रदायच "ओं वशिष्ठायनमः।" अतिशयेन सर्वत्र वसवे सर्ववासाय सर्वानन्द घनस्वरूपायच। "ओंकुबेरायनमः" ॥ स्वव्याप्त्या सर्वजगदाच्छादकाय सर्वधनायसर्वधनप्रदायच पर ब्रह्मणेनमः॥ एतैर्नामभिः पूर्वादिक क्रमेण परिक्रमां कुर्वन्सर्वव्यापिनं सर्वरक्षकमीश्वरं प्रार्थयेत्॥

अथोपस्थान मंत्राः॥

ओ मुद्वयन्तमस स्परिस्वः पश्यन्त उत्तरम्॥देवन्देवत्रा सूर्य्यमगन्मज्योतिरुत्तमम् ॥ १ ॥ उद्। बयम्। तमसः। परि। स्वः। पश्यन्त। उत्तरम्। देवम्। देवत्रा। सूर्य्यम्। अगन्म। ज्योतिः। उत्तमम्॥ १ ॥ हेपरमात्मन्

"सूर्य्यम्" चराचरात्मानमत्वाम् "पश्यन्त" प्रेक्षमाणा-स्सन्तो "वयम्" उदगन्म ॥ अर्थात् उत्कृष्ट श्रद्धावन्तो भवन्तम्प्राप्नुयाम । अनेके विज्ञानवन्तो। जनाः भवन्त-मप्राप्तवन्तो वयमपि भवत्प्राप्ति मत्यन्तम् प्रार्थयामहे। कथम्भूतं त्वाम् "ज्योतिः" स्वप्रकाशम् "उत्तमम्" सर्वथो-त्कृष्टम्। देवत्रा" सर्वेषु दिव्यगुणवत्सुपदार्थेषुह्यनन्त दिव्य गुणैर्युक्तम्। "देवम्" धर्म्मात्मनां मुमुक्षूणाम्मुक्तानांच सर्वा-नन्दस्य दातारं मोदयितारंच। "उत्तरम्" जगत् प्रलयान्ते पि नित्य स्वरूपत्वाद्विराजमानम्। "स्वः" सर्वानन्दस्वरू-पम् "तमसस्परि" अज्ञानान्धकारात् पृथक्भूतम् भवन्तम् प्राप्तम्वयं नित्यम् प्रार्थयामहे। भवान् स्व कृपया सद्यः प्राप्नोतुनः ॥ १ ॥ "ओ मुदुत्यंजातवेदसन्देवम्वहन्ति के-तवः दृशेविश्वाय सूर्य्यम्" ॥ २ ॥ उद्। उ। त्यम्। जात-वेदसम्। देवम् वहन्ति केतवः। दृशे। विश्वाय। सूर्य्यम् "त्यम्" तम् पूर्वोक्तम्देवं "केतवः" किरणाविविध जगतः पृथक् पृथ ग्रचनादि नियामका ज्ञापकाः प्रकाशका गुणाः "दृशे बिश्वाय" बिश्वंद्रष्टुं बिश्वस्य दर्शनायवा। "सूर्य्यं" चराचरात्मानम्परमेश्वम्। उद्वहन्ति उत्कृष्टतया प्रा-पयन्ति, ज्ञापयन्ति, प्रकाशयन्तिवै ॥ "उ" इति बितर्के बिबिध नियमान् पृथक्.२ दृष्ट्वा नास्तिका अपि ईश्वरं त्यक्त्वा नैव समर्था भवन्ती त्यभिप्रायः। कथम्भूतन्देवं "जातवेदसम्" जाताऋग्वेदादयश्चत्वारो वेदास्सर्वज्ञ ज्ञा-न साधनशास्त्र सर्वोपकारकं यस्माज्जातानि प्रकृत्यादीनि भूतान्यसंख्यातानि बिन्दति प्राप्नोति प्राप्तोस्तिवा। यद्वा

जातं सकलं जगद्वेत्ति जानातियः सजातवेदास्तं "जातवेदसम्" सर्वे मनुष्यास्तमेवैकं प्राप्तु मुपासितु मिच्छ न्त्वित्यभिप्रायः॥२॥ ओं चित्रन्देवाना मुदगादनीकञ्चक्षु र्मित्रस्य वरुणस्याग्नेः॥ आप्राद्यावापृथ्वी अन्तरिक्षग्वं॥१०॥सूर्य्य आत्मा जगत स्तस्थुषश्च॥३॥ चित्रम्। देवानाम्। उद्। अगात्। अनीकम्। चक्षुः। मित्रस्य वरुणस्य। अग्नेः। आप्राद्यावा पृथिवी। अन्तरिक्षम् सूर्य्यः आत्माजगतः तस्थुषः॥ च॥ ३॥ सएव देवस्सूर्य्यः जगतः जङ्गमस्य तस्थुषः स्थावरस्य अतति सर्वत्रव्याप्नोतीत्यात्मास्ति तथाद्यौः पृथिवी अन्तरिक्षञ्चैतदादि सर्वंजगद्रचयित्वा आप्राआसमन्ताद्धारयन्सन्रक्षति एषएवै तेषाम् प्रकाश कत्वा द्वाह्याभ्यन्तरयो श्चक्षुः प्रकाशको विज्ञानमयो विज्ञापकश्च, अत एव मित्रस्यसर्वेषु द्रोहरहितस्य वरुणस्यवरेषु श्रेष्ठेषु कर्म्मसुगुणेषु वर्त्तमानस्य च अग्नेः विज्ञानादि विद्यावतो विदुषः भ्राजमानस्यापि चक्षुः सर्वसत्यविद्योपदेष्टा प्रकाशकश्च देवानाम् दिव्य गुणवताम् हृदये उदगात्। उत्कृष्टतया प्राप्तोस्ति प्रकाशकोवा, तदेव ब्रह्मचित्रम् अद्भुत स्वरूपम्" आश्चर्योस्यवक्ता कुशलोस्य लब्धा। आश्चर्योस्य ज्ञात कुशलानुशिष्टः) इतिश्रुतेः॥ अद्भुत स्वरूपत्वाद् ब्रह्मणः॥ तदेव ब्रह्मसर्वेषाञ्चास्माकं अनीकम् सर्वदुःखनाशार्थं काम क्रोधादि शत्रु विनाशार्थं वलमस्ति तद्विहाय मनुष्याणां सर्वसुखकरं शरण मन्यन्नास्तेवेति वेद्यम्॥ ३॥ ओंतच्चक्षुर्देवहितम्पुरस्ताच्छुक्रमुच्चरत्पश्येम शरदः शतंजी

वेम शरदः शतं शृणुयाम शरदः शतम् प्रब्रवाम शरदःश-तमदीनाः स्यामशरदः शतं भूयश्च शरदः शतात् ॥ ४ ॥

चक्षुः देवहितम्। पुरस्तात्। शुक्रम्। उच्चरत्। पश्येम। शरदः। शतम्। जीवेम। शरदः। शतम्। शृणुयाम। श-रदः। शतम्। प्र। ब्रवाम। शरदः। शतम्। अदीनाः। स्याम। शरदः। शतम्। भूयः। च। शरदः। शतात्॥ ४॥

तद्ब्रह्मचक्षुः सर्वदृक् देवेभ्यो हितम् देवहितम् दिव्य गुणवताम् धर्मात्मनाम् विदुषाम् स्वसेवकानाञ्च हित-कारि"पुरस्तात् पूर्वसृष्टेः प्राक् सच्चिदानन्द स्वरूपत्वात्त-देवासीत् नान्यत् शुक्रम् सर्वजगत्कर्तृ शुद्धञ्च तदेवास्ति उच्चरत् उत्कृष्टतया सर्वत्रव्याप्तम् विज्ञान स्वरूपं तदेवेदानीमस्त्येव॥ उद् प्रलयात् ऊर्द्ध्वं सर्व सामर्थ्यं तदेवस्थास्यति नान्यत्। तद्ब्रह्म शतं शरदः शतं वर्षाणि "पश्येम" तस्यैवप्रेक्षणं कुर्य्याम। तथा तत्कृपया शतं शरदोजीवेम॥ प्राणधारणं कुर्य्याम्। तथा शतं शरदः तस्यगुणाः श्रद्धा विश्वासवन्तोवयम् शृणुयाम। तथा च तद् ब्रह्मतद्गुणांश्च"प्रब्रवाम" नामान्येभ्यो मनुष्येभ्यो नित्यमुपदिशेम शतं शरदःएवञ्च तदुपासनेन तद्विश्वासेन तत्कृपयाचशतं शरदः शतवर्ष पर्यंतमदीनाःस्यामभूयाः-स्म। कदाचित्कस्यापि समीपे दीनता कर्तव्या नभवेन्नो दारिद्र्यञ्च सर्वदा सर्वथा तद्ब्रह्मकृपया स्वतंत्रावयमभू-याःस्म। तथातस्यैवानुग्रहेणभूयः शताच्छरदः शताद्वर्षे-भ्योप्यधिकं वयम् पश्येम,जीवेम, शृणुयाम,प्रब्रूवाम,अ-दीनाःस्यामचेत्यन्वयः।अत्यन्तकृपालुम्परमेश्वरन्त्यक्त्वा-

न्यम् नोपासीरन्नोयाचेरन् इत्यभिप्रायः योन्यदेवमुपास्ते सपशुरेव "देवाना" मितिश्रुतेः ॥ ४ ॥ कृतांजलिर्भूत्वैतैर्मंत्रैः स्तुवन्नीश्वरम् सर्बकामसिध्यर्थं संप्रीत्या प्रार्थयेत् ॥

अथसमर्पणम् ॥

हे ईश्वर दयानिधे भवत्कृपयानेन जपादिकर्मणा धर्म्मार्थकाममोक्षाणान्नःसद्यः सिद्धिर्भूयात् ॥ ततईश्वरं नमस्कुर्य्यात् अमुकशर्म्माहम्भोस्त्वामभिवादये । अमुकबर्म्माहम्भोस्त्वा मभिवादये। अमुकगुप्तोहंभोस्त्वामभिवादये। इत्यभिवादनम् ॥

अथप्रार्थनामंत्र:

ओं सूर्य्यश्चमामन्युश्चमन्युपतयश्च मन्युकृतेभ्यःपापेभ्यो रक्षन्ताम्। यद्रात्र्या .पापमकार्षम्मनसा वाचा हस्ताभ्याम्पद्भ्यामुदरेणशिश्ना ॥ रात्रिस्तदवलुम्पतुयत्किञ्चिद्दुरितम्मयिइदमहम्माममृतयोनौ सूर्येज्योतिषि जुहोमिस्वाहा ॥ सूर्यः । च । मा । मन्युः । च । मन्युपतयः च । मन्युकृतेभ्यः । पापेभ्यः । रक्षन्ताम् । यत् । रात्र्या । पापम् । अकार्षम् । मनसा । वाचा । हस्ताभ्याम् । पद्भ्याम् । उदरेण । शिश्ना । रात्रिः । तत् । अवलुम्पतु यत् । किञ्चिद् । दुरितम् । मयि । इदम् । अहम् । माम् । अमृतयोनौ । सूर्ये । ज्योतिषि । जुहोमि । स्वाहा । सूर्यः "चराचरात्मेश्वरः" मन्युः "दुष्टान्मनुष्यान्प्रतिक्रोध" कृत" मन्युपतय ॥ ईश्वरदत्ताबिज्ञानशान्त्यादयोगुणाः" । मन्युकृतेभ्यः "क्रोधकृतेभ्यः । पापेभ्यः सूर्यश्च मन्युश्च मन्युपतयश्च सर्बेमामांरक्षन्ताम् यत्कृपयाक्रोधादिकृतेभ्यः पा-

पेभ्यो निवृत्तं कुर्वन्तु ॥ कदाचित् पापकरणे मम रुचि-
रेवनस्यात् ॥ तत्कृपया तदुपासनेनच वयम्पुण्यात्मानो
भूयाः स्म अग्रे कदाचिद्वयम् पापं नैव करिष्याम । इत्य-
भिप्रायः । "यत्तुरात्र्या रात्रौ,अज्ञानात् मनसा,वाचा, ह-
स्ताभ्याम्, पद्भ्याम्, उदरेण, शिश्ना लिंगेन्द्रियेण,पा-
पमकार्षम् कृतवानहम्, रात्रिः सर्वस्यादाताधारक आ-
नन्द प्रदश्चेश्वरः तत्पापम् कृपया भवान्अवलुम्पतु"
दूरीकरोतु,नाशयतुक्षमताम्। यत्किंचित् "अज्ञानात् दुरि-
तम्" दुष्टम्, अनाद्यविद्या रूपान्धकारभूतम् किल्विष-
मस्ति मयिवर्ततेतदिदमपि भवान्कृपया "अवलुम्पतु"
येयै जगति मम समीपे च पदार्थास्सन्ति तेते सर्वेभवद्र-
चिता भवत्पतिकाश्च अतोवयम् भवते किन्दातुं समर्थाः
किंतु कोपि पदार्थोस्माकं नास्त्येव भवत एवं च सर्वे प-
दार्थाः संतीति निश्चयः । परंतु भवद्रचिता आत्मानो वयं
विद्यामहे । तस्मादहंस्वात्मात्मानं अमृतयोनौ अमृतस्य
मोक्षस्य कारणभूतेयम् प्राप्यपुनर्जन्ममरणे कदाचिन्नेव
भवतः ज्योतिषि स्वप्रकाशे अविद्यान्धकार नाशकेत्वयि
सच्चिदानन्द स्वरूपे जुहोमि ददामि भवदर्थं स्वात्मानं
करोमि निश्चयेनेत्यभिप्रायः "स्वाहा" स्वकीय आत्मा
यत् सत्यमाह । अन्तर्य्यामीयस्मिन्कर्मणि अनुमतिन्द-
दातीतितत्सत्यमेव वक्तव्यम् कर्तव्यञ्च । यद्वास्वावाक्
अन्तर्य्याम्यनुकूलतयायदाहतत्कर्तव्यंवक्तव्यञ्चेत्ययमर्थः
स्वाहाशब्दस्यायमर्थउक्तः शतपथ ब्राह्मणे॥हेजगदीश्वर
हे सर्वान्तर्य्यामिन् अज्ञानादि प्रमादाद्यद्यत्पापं येन

येनांगेनकृतम्मयातत्तत्सर्वं विज्ञानादि दानेनकृपयाक्षमस्व कदाचित्केनचित्पापंस्वल्पमपिनैवकर्तव्यमित्यभिप्रायः ॥

अथ गुरुमंत्रः ॥

ओं भूर्भुवः स्वः तत्सवितुर्वरेण्यम्भर्गोदेवस्य धीमहि धियोयोनः प्रचोदयात् ॥ अस्य सर्वोत्कृष्टस्य गायत्री मंत्रस्यसंक्षेपेणार्थ उच्यते ॥ अ, उ, म्, एतत् त्रयम्मिलित्वा "ओं"इत्यक्षरम्भवति। एतच्च सर्वोत्तमम्परब्रह्मणो नामास्ति एतेनैकेनैवनाम्नापरमेश्वरस्यानेकानिनामान्यागच्छन्तीति विज्ञेयम् ॥ तद्यथा अकारेण विराडग्नि विश्वादीनिनामान्यागच्छन्तीति वेद्यानि। तदर्थश्च, विविधं चराचरं जगद्राजयते प्रकाशयते सविराट् सर्वात्मेश्वरः। अञ्चते, अच्यते, गम्यते, प्राप्यते, सत्क्रियते वेदादिभिः शास्त्रैर्विद्वद्भिश्चेत्यग्निः परमेश्वरः॥विष्टानि सर्वाण्याकाशादीनि भूतानिसन्ति यस्मिन्सविश्वः। यद्वाविष्टोस्ति प्रकृत्यादिषुयः सविश्वः। एतदाद्यर्था अकाराद्विज्ञेयाः ॥ उकारेण हिरण्यगर्भ, वायु, तैजसादीनि नामानीश्वरस्यायान्ति, तद्यथाहिरण्यम् तेजसो नामास्ति, हिरण्यानिसूर्यादीनि तेजांसिगर्भे यस्य स हिरण्यगर्भः यद्वाहिरण्यानां सूर्यादीनां तेजसां गर्भोधिष्ठानं स हिरण्यगर्भः। वाति धारयत्यनन्त बलत्वात् सर्वं जगत्सवायुः सचेश्वर एव नान्यः सूर्यादीनाम्प्रकाशकत्वात् स्वयम् स्वप्रकाशत्वात्तेजस ईश्वरः एतदाद्यर्था उकाराद्विज्ञातव्यः ॥ मकारेणेश्वरादित्य प्राज्ञादीनि नामानि बोध्यानि। तद्यथाईष्टेऽसावीशस्सर्वशक्तिमान् न्यायकारीश्वरः अविनाशित्वान्नि-

त्यानंदस्वरूपत्वादादित्यः परमात्मा। प्रजानाति सकलं जगत् प्रकृष्टश्चासौज्ञश्च विज्ञानस्वरूपत्वात्प्राज्ञःप्रज्ञएव प्राज्ञः। एतदाद्यर्था मकारान्निश्चेतव्या ध्येयाश्चेति प्रणवार्थः संक्षेपतः॥

अथ महाव्याहृत्यर्थाः संक्षेपतः॥

भूरितिप्राणः, भुवरित्यपानः,स्वरितिव्यानः। इतितैत्तिरीयोपनिषद्वचनम्॥ प्राणति जीवयति सर्वान् प्राणिनस्ससउप्राणस्य प्राणः प्राणः प्राणादपिप्रियस्वरूपो वासचेश्वरएव। अपानयति दूरीकरोति सर्वंदुःखं मुमुक्षूणां मुक्तानां स्वसेवकानां धर्म्मात्मनां यस्सोपानो दयालुरीश्वरः। व्यानयति चेष्टयति प्राणादि सकलं जगदभिव्याप्य स व्यानस्सर्वाधिष्ठानं बृहद्ब्रह्म एतदाद्यर्था महाव्याहृतीनां ज्ञातव्याः॥ तत्, सवितुः,वरेण्यम्,भर्गः,देवस्य, धीमहि, धियः, यः, नः, प्रचोदयात्॥ सुनोति, सुवति सूतेवोत्पादयति सृजति, सकलं जगत् स सर्वपितासर्वेश्वरः॥ स सवितापरमात्मावरंवर्तुमर्हति श्रेष्ठंयत्स्वरूपं तद्वरेण्यम्, निरुपद्रवं निष्पापं निर्गुणं शुद्धंसकलदोषरहितं पक्वम् परमार्थस्वरूपं विज्ञानस्वरूपं यत्तद्भर्गः। दीव्यति, प्रकाशयति, मोदयति,खल्वानंदयति,सर्वं विश्वं सदेवः तस्यदेवस्य धीमहि तस्यधारणे विज्ञानादि बलेनैववयम् पुष्टाभवेम। "धियो,,धारणावत्योबुद्धयः "यः,, परमेश्वरः"नः,,अस्माकम्"प्रचोदयात्,,प्रेरयेत्। हे सच्चिदानन्दस्वरूप, हे नित्यशुद्धबुद्ध मुक्तस्वभाव, हे अज, हे निराकार सर्वशक्तिमन्न्यायकारिन्,हे करुणामृतवा-

रिधे "सवितु" र्देवस्यतवयद्वरेण्यम्भर्गस्तद्वयं "धीमहि" कस्मैप्रयोजनाय "यः" सविता देवः परमेश्वरः सः भवान्नोऽस्माकंधियोबुद्धीः प्रचोदयात् ॥ ब्रह्मचर्यविद्याविज्ञानसद्धर्म जितेन्द्रिय परब्रह्मानंदप्राप्तिमतीः स्वकृपा कटाक्षेण परमेश्वरः स्वशक्त्याकुर्य्यादस्मैप्रयोजनाय तत्परमात्मस्वरूपंवयंधीमहीतिसंक्षेपतोगायत्र्यर्थोविज्ञेयः॥ एवंप्रातस्सायंद्वयोस्सन्ध्ययोरेकान्तदेशंगत्वाशान्तोभूत्वा यतात्मा सन् परमेश्वरं प्रतिदिनम् ध्यायेत् ॥

इति प्रातस्सायंसंध्योपासनविधिस्समाप्ता ॥

अथ सायंसंध्येश्वरप्रार्थनायामयमेकोमंत्रोभिन्नोऽस्ति ।

ओम् अग्निश्चमा मन्युश्च मन्युपतयश्च मन्युकृतेभ्यः पापेभ्योरक्षन्ताम् । यदह्नापापमकार्षंमनसावाचाहस्ताभ्याम्पद्भ्यामुदरेणशिश्ना॥ अहस्तदवलुम्पतुयत्किञ्चिद् दुरितम्मयि । इदमहम्मामृतयोनौ सत्ये ज्योतिषि जुहोमि स्वाहा ॥ अग्निः । च । मा । मन्युः । च । मन्युपतयः । च । मन्युकृतेभ्यः । पापेभ्यः । रक्षन्ताम् । यत् । अह्ना । पापम् । अकार्षम् । मनसा । वाचा । हस्ताभ्याम् । पद्भ्याम् । उदरेण । शिश्ना । अहः । तत् । अवलुम्पतु । यत् । किञ्चित् । दुरितम् । मयि । इदम् । अहम् । माम् अमृतयोनौ । सत्ये । ज्योतिषि । जुहोमि । स्वाहा ॥ अञ्चुगतिपूजनयोः । अगि गत्यर्थः अग्नोपपदात् णीञ्प्रापणे इत्यादिभ्यो धातुभ्यः अग्निशब्दस्सिध्यति । अगमानंदं मखं अगान् गुणांवा नयतिप्रापयति सोयमग्निः परमेश्वरः अन्यार्थः ओंकारार्थोद्रष्टव्यः ॥ "यदन्हा" दिवसे

"अहः"स्वप्रकाशरूपः । "सत्ये"त्रैकाल्यबाध्ये अन्यत्सर्वं सुगमंचमंतिमं मंत्रार्थंव्याख्यावद्विज्ञेयम् ॥ सायंसंध्यायामिमंमंत्रंविहायान्यत्सर्वंप्रातस्संध्यावद्विज्ञेयंकर्त्तव्यंचेति।

अथाग्निहोत्रविधिर्लिख्यते संक्षेपतः ॥

ओं भूरग्नयेप्राणायस्वाहा, ओम्भुववीयवेऽपानाय स्वाहा, ओं स्वरादित्याय व्यानायस्वाहा, ओं भूर्भुवः स्वरग्निवाय्वादित्येभ्यः प्राणापानव्यानेभ्यःस्वाहा, ओमापो ज्योतीरसोऽमृतं ब्रह्मभूर्भुवः स्वरोंस्वाहा, ओंसर्वंवैपूर्णः स्वाहा ॥ आग्नौयावदिच्छेत्तावद्गायत्रीमंत्रेणस्वाहांतेन होमंकुर्य्यात् प्रातस्सायंसन्ध्योपासनकरणानन्तरम् ॥ एतानिसर्वाणिश्वरनामान्येववेद्यानि । एतेवमर्थागायत्र्या द्रष्टव्याः ॥ अग्नयेपरमेश्वराय तदर्थंहोत्रं,हवनंक्रियतेयस्मिन्कर्म्मणि तदग्निहोत्रम् ॥ ईश्वराज्ञापालनार्थंवा ॥ सुगन्धि, पुष्टि, मिष्ट, रोगनाशक, बुद्धिवृद्धिकरैर्गुणैर्युक्तानान्द्रव्याणां होमेन वायुवृष्टि जलयोः शुद्ध्यपृथ्वीस्थ पदार्थानाम्सर्वेषांशुद्धवायुजलयोगा दत्यन्तोत्तमम् तया सत्वात् सर्वेषां जीवानां तदुपचारतयात्यन्तसुखलाभो भवतीश्वरस्तदुपरिप्रसन्नश्चेत्यतदाद्यर्थमग्निहोत्रकरणम् ॥ इति संक्षेपतोग्निहोत्रविधिस्समाप्ता ॥

अथ तर्पणविधिर्लिख्यते ॥

तृप्यन्तितर्प्पयंत्यनेन शिष्टान्धर्म्मात्मनो दिव्यगुणवतो ज्ञानिनस्तत्तर्पणम् ॥

अथ देवतर्पणम् ॥

ओं ब्रह्मादयो देवास्तृप्यन्ताम् ॥ १ ॥ ओं ब्रह्मादि

देवपत्न्यतृप्यन्ताम् ॥ १ ॥ ओं ब्रह्मादिदेवसुतास्तृप्यन्ताम् ॥ १ ॥ ओं ब्रह्मादिदेवगणास्तृप्यन्ताम् ॥ चतुर्वेदविद्भ्यः दिव्यगुणवद्भ्यःतत्स्त्रीभ्यस्तद्दशीभ्यस्तत्सुतेभ्यस्तेभ्यःतत्तच्छिष्येभ्योगणेभ्यश्च श्रेष्ठाःपदार्था देयाःसर्वैरिति ॥ ईदृशाजनाः देवाभवन्ति इतिवेद्यम् ॥

अथर्षितर्पणम् ॥

ओम्मरीच्यादय ऋषयस्तृप्यन्ताम् ॥ २ ॥ ओम्मरीच्याद्यृषिपत्न्यस्तृप्यन्ताम् ॥ २ ॥ ओंमरीच्याद्यृषि सुतास्तृप्यन्ताम् ॥ २ ॥ ओंमरीच्याद्यृषिगणास्तृप्यन्ताम् २ ॥ वेदादिविद्याध्यापकास्तद्विद्याध्येतारश्चर्षयो वेद्याः ॥

अथपितृतर्पणम् ॥

ओं सोमसदःपितरस्तृप्यन्ताम् ॥ ३ ॥ सोमे ईश्वरे सोमयागेवासीदन्ति सोमगुणाश्च जनैर्ग्राह्याः ॥ ओम् अग्निष्वात्ताः पितरस्तृप्यन्ताम् ॥ ३ ॥ अग्निरीश्वरः सुष्ठुतया आत्तो गृहीतोयैस्ते अग्निष्वात्ताः । यद्वाअग्नेर्गुणज्ञानात्पदार्थविद्याःपृथिवी जलव्योमयानयंत्र रचनादिकाःसुष्ठुतया आत्तागृहीतायैस्तेअग्निष्वात्ताः ॥ ओम् बर्हिषदः पितरस्तृप्यन्ताम् ॥ ३ ॥ बर्हिषिसर्वोत्कृष्टेब्रह्मणि शमदमादिषूत्तमेषुगुणेषुवासीदन्तितेबर्हिषदः ॥ ओम् सोमपाः पितरस्तृप्यन्ताम् ॥ ३ ॥ यज्ञेनोत्तमौषधिरसम्पिबन्तिपाययन्तिवातेसोमपाः । ओम्हविर्भुजः पितरस्तृप्यन्ताम् ॥ ३ ॥ हविर्हुतमेव यज्ञेन शोधितं वृष्टिजलादिकं भोक्तुम्भोजयितुंशीलमेषान्तेहविर्भुजः ॥ ओम् आज्यपाः पितरस्तृप्यन्ताम् ॥ ३ ॥ आज्यंघृतं ॥ अजगतिक्षेपणयो

द्वीत्वर्थादाज्यं विज्ञानं पांति रक्षन्ति पाययन्ति रक्षयन्ति विज्ञेनयेविद्वांसस्ते आज्यपाः ॥ ओम्सुकालिनःपितरस्तृप्यन्ताम् ॥ ३ ॥ शोभनः ईश्वरविद्योपदेशस्य करणस्य ग्रहणस्य कालोयेषान्ते सुकालिनः ॥ यद्वा ईश्वर ज्ञानप्राप्त्या सुखरूपाः सदैव कालो येषान्ते सुकालिनः ॥ ओम्यमादिभ्योनमः यमादींस्तर्पयामि ॥ ३ ॥ पक्षपातं विहाय व्यवस्थाकर्त्तारोवा ॥ ओम्पितृभ्यःस्वधायिभ्यःस्वधानमः पितृंस्तर्पयामि सुष्टुतयाश्रेष्ठान्विदुषो गुणान्वा सयद्भ्यस्तत्रवसद्भ्यश्चवसुभ्यः विज्ञानाद्यनन्त धनेभ्यः स्वानूजनान्धारयद्भ्यः पोषयद्भ्यश्च ॥ यद्वा व्यापकायेश्वराय सर्वत्र वसवे ॥ ओम्पितामहेभ्यः स्वधायिभ्यः स्वधानमः पितामहांस्तर्पयामि ॥ ३ ॥ रुद्रेभ्यः पक्षपातरहितेभ्यः दुष्टानूरोदयद्भ्यः रुद्रायेश्वरायवा- ओंप्रपितामहेभ्यः स्वधायिभ्यः स्वधानमः प्रपितामहांस्तर्पयामि ॥ ३ ॥ आदित्यवदुत्तमानूगुणानूप्रकाशकेभ्यः विद्वद्भ्यःआदित्यविनाशिनईश्वरायवा ॥ ओम् मात्रे स्वधानमोमातरन्तर्पयामि ॥ ३ ॥ ओं पितामह्यैस्वधानमः पितामहींस्तर्पयामि ॥ ३ ॥ ओं प्रपितामह्यै स्वधानमः प्रपितामहींस्तर्प्पयामि ॥ ३ ॥ पित्रादिसदृशीभ्यस्तत्स्त्रीभ्यः ॥ ओं सत्पत्न्यैस्वधानमस्तत्पत्नींस्तर्प्पयामि॥३ ॥ प्रीत्यासत्कारार्थोयमारम्भः ॥ ३ ॥ ओं सगोत्रेभ्यःस्वधानमः सगोत्रांस्तर्प्पयामि ॥ ३ ॥ स्वसमीपं प्राप्तेभ्यःपुत्रादिभ्यः ॥ ३ ॥ ओमाचार्य्यादिभ्यः सम्बन्धिभ्यःस्वधानमः आचार्य्यादीन्सम्बधिनस्तर्प्पयामि ॥ ३ ॥ गुर्वादि स-

स्यन्तेभ्यः॥ एतेषांसोमसदादीनां श्रद्धयातर्प्पणंकार्य्यं विद्यमानानाम्॥ श्रद्धयायत्क्रियते तत्श्राद्धम् तृप्त्यर्थं यत्क्रियते तत्तर्प्पणम् "वसून्वदन्ति वैपितॄन् रुद्रांश्चैव पितामहान्॥ प्रपितामहांश्चादित्यान् श्रुतिरेषासनातनी" यैश्चतुर्विंशतिवर्ष पर्य्यन्तम् ब्रह्मचर्य्यं कृतन्ते वसवः पितृवत्सत्कर्तव्याः। यैश्चतुश्चत्वारिंशद्वर्ष पर्य्यंतम्ब्रह्मचर्य्यं कृतंते रुद्राःपितामहवत्सत्कर्त्तव्याः पित्रपेक्षयाधिक विद्यावत्वात्॥ यैरष्टचत्वारिंशद्वर्षपर्य्यंतंजितेन्द्रियै विद्याध्ययनार्थम्ब्रह्मचर्य्यंव्रतंकृतं ते आदित्याः॥ प्रपितामह वत्सत्कर्त्तव्याः॥ पितृपितामहादीनां सकाशात्पूर्णविद्यावत्वात्सर्वेभ्योधिक सत्कारः कर्त्तव्यः अत्रार्थप्रमाणभूता पुरुषोवाच यज्ञ इत्यादि श्रुतयःप्रतिपादिताः छान्दोग्योपनिषदिद्रष्टव्याः॥अक्रोधनाः शौचपराःसततंब्रह्मचारिणः॥ न्यस्तशस्त्रामहाभागाः पितरःपूर्वदेवताः॥ अक्रोधनान्सुप्रसादा न्वदन्त्येतान्पुरातनान् लोकस्याप्यायने युक्तान् श्राद्धदेवान्द्विजोत्तमान्॥ इति मनुस्मृतेस्तृतीयाध्यायस्थौश्लोकौस्तः॥ अनेनप्रमाणेन युक्तयाचविद्यामानान्विदुषः श्रद्धया सत्कारेण तृप्तान्कुर्य्यादित्यभिप्रायः श्राद्धदेवान्द्विजोत्तमानित्युक्तत्वात्॥ अज्ञोभवतिवैबालः पिता भवति मंत्रदः॥ अज्ञंहिबालमित्याहुः पितेत्येवंतुमंत्रदम्॥ इत्यादिक मनुस्मृतेर्द्वितीयाध्यायउक्तम्॥ येज्ञानिनो मनुष्यास्ते पितृवत्सत्कर्त्तव्याः॥ कस्मादज्ञज्ञान शून्यम्मनुष्यं बालमित्याहु र्ज्ञानिनंपितरञ्चेतिवेदादिपूक्तत्वात्॥ "त्वन्नःपिताअविद्यायाःपरस्पारन्तारयत्वि" त्या-

दिछान्दोग्योपनिषदादिश्रुतिभ्यः ॥ इतितर्पणाभिप्राय उक्तःसंक्षेपतः ॥ देवतर्पणे द्विजेनैकेकस्मैएकैकांजलिरुपवीतिनैकैकेनमंत्रेणादेयः ॥ एवंनिवीतिनाच द्वौद्वावंजलीकण्ठस्थेनयज्ञोपवीतिनऋषिभ्यः ॥ एवमेवचापसब्येनचत्रीं स्त्रीनंजलीन्दद्यात्पितृभ्यः पूर्वोत्तरदक्षिणादिकेनक्रमेणेति ॥ इति तर्प्पणविधिः समाप्ता ॥

अथ बलिवैश्यदेवविधिर्लिख्यते ॥

वैश्यदेवस्य सिद्धस्य गृह्येग्नौ विधिपूर्वकम् ॥ आभ्यः कुर्य्याद्देवताभ्यो ब्राह्मणोहोममन्वहम् ॥ १ ॥ यदन्नं पक्वम्भोजनार्थ म्भवेत्तेनैव बलिवैश्यदेवकर्म कार्य्यम् ॥ ओं पुनन्तुमांदेवजनाः पुनन्तुमनसा धियः ॥ पुनन्तु विश्वा भूतानिजातवेदः पुनीहि मास्वाहा ॥ २ ॥ पुनन्तु ।मा।देव जनाः । पुनन्तु । मनसा । धियः । पुनन्तु । विश्वाभूतानि जातवेदः । पुनीहि । मा । स्वाहा ॥ हेजातवेदः परमेश्वर मा माम् पुनीहि सर्वथा पवित्रं कुरु भवदुत्पादितादेवजना विद्वांसःश्रेष्ठाज्ञानिनस्तेपि विज्ञान विद्यादानेनमाम् पुनन्तु पवित्रंकुर्वंतु तथामनसाभवद्दत्तविज्ञानेन भवद्विषय ध्यानेन वा नोबुद्धयः पुनन्तु पवित्रा भवन्तु तथा भवत्कृपयाविश्वानिसर्वाणि संसारस्थानि भूतानि पुनन्तु पवित्राणि सुखानन्दयुक्तानि भवन्तु ॥ ओमग्नयेस्वाहा । अग्न्यर्थ उक्तः।ओंसोमायस्वाहा । सर्वानन्द प्रदाय सर्व जगदुत्पादकायच । ओं मग्नीषोमाभ्यांस्वाहा । प्राणापानाभ्या मनयोरर्थो गायत्री मन्त्रार्थ उक्तः । ओं विश्वेभ्यो देवेभ्यः स्वाहा । विश्वस्थेभ्यो विश्वप्रकाशकेभ्य ईश्वर

गुणेभ्यः विद्वद्भ्योवा। ओं धन्वन्तरयेस्वाहा। सर्वरोग विनाशकायेश्वराय। ओं कुह्वैस्वाहा। अमावस्येष्टिप्रति पादितायैचितृशक्तये। ओं अनुमत्यैस्वाहा। विद्यापठनानन्तरं मतिर्मननज्ञानंयस्याश्चेतिसः साचितिशक्तिरनुमतिः। ओं प्रजापतयेस्वाहा। सर्वजगत्स्वामी रक्षक ईश्वरः। ओं सहद्यावा पृथिवीभ्यां स्वाहा। ईश्वरेणसहोत्पादिताभ्यां यद्वापृथुविस्तारे सर्वस्मिन् जगति विस्तृतो व्यापकः। द्यौःसर्वंजगत्प्रकाशकः सुखस्वरूपो वेश्वरोत्र गृह्यते। ओं स्विष्टकृतेस्वाहा। सुष्टुशोभनमिष्टंसुखंकरोतियस्सचेश्वरः। एतैर्मंत्रै र्होमं कृत्वाग्नेः सजलेन हस्तेन परिक्रमणं कुर्यात्॥

अथ बलिप्रदानम्॥

ओं सानुगायेन्द्रायनमः। पूर्वस्यान्दिशि। नित्यैर्गुणैस्सहवर्त्तमानः परमैश्वर्यवानीश्वरोत्र गृह्यते। ओं सानुगाययमायनमः। दक्षिणस्यांदिशि। पक्षपातरहितोन्यायकारित्वादिगुणयुक्तः परमात्मात्रवेद्यः। ओं सानुगाय वरुणायनमः। पश्चिमायान्दिशि। विद्याद्युत्तमगुणविशिष्टस्सर्वोत्तमः परमेश्वरोत्रगृहीतव्यः। ओं सानुगायसोमाय नमः। उत्तरस्यांदिशि। अस्यार्थउक्तः। ओं मरुद्भ्योनमः। द्वारि। मरुतः प्राणाः ईश्वराधारेण सकल विश्वन्धारयन्ति चेष्टयन्तिच "सः प्राणस्य प्राणः" इति केनोपनिषदे जात्याख्यायामेकस्मिन् बहुवचनमन्यतरस्यां। ओं मरुद्भ्योनमः। अप्सुवायव्यांदिशि। अस्यार्थः शन्नोदेवीरित्यत्रोक्तः। ओं वनस्पतिभ्योनमः। मुसलोलूखले

आग्नेय्यांदिशि । बनानांसेव्यसर्बलोकानां पतय ईश्वरो बहुबचनमन्त्रादरार्थम् । ओं श्रियैनमः । ऐशान्यान्दिशि । श्रीयतेसेव्यते सर्बैर्ज्जनैस्साश्री रीश्वरस्सर्बसुखशोभावत्वात् । ओं भद्रकाल्यैनमः । नैऋत्यांदिशि । भद्रं कल्याणं सुखं कलयितुं शीलमस्याः सा भद्रकालीश्वरः । ओं ब्रह्म पतयेनमः ब्रह्मणस्सर्बशास्त्रविद्यायुक्तस्यवेदस्य पतिरीश्वरः । ओं वास्तुपतयेनमः । वास्तुमध्ये । बसन्तिसर्बाणि भूतानि तद्वास्त्वाकाशंतत्पतिरीश्वरः । ओं विश्वेभ्योदेवेभ्योनमः । अस्यार्थउक्तः । ओं दिवाचरेभ्योभूतेभ्योनमः । ओंनक्तञ्चारिभ्योभूतेभ्योनमः आकाशेदिवसेयानिभूतानि बिचरन्तिरात्रौचतानिर्बिघ्नम्मा कुर्वंतु । तैस्सहा बिरोधोस्तु नएतदर्थोयमारम्भ । ईश्वर कृपयैवभवेन्नः । ओं सर्बात्म भूतयेनमः । एष्टवास्तुनि सर्बेषां जीवात्मनां भूतिर्भवनं सत्वेश्वरोनान्यः । अपसव्यम् ॥ ओंपितृभ्यः स्वधायिभ्यः स्वधानमः ॥ इतिनित्यश्राद्धम् ॥ अस्यार्थ उक्तःपितृतर्पणे । नमः इत्यस्य निरभिमानद्योतनार्थः परस्योत्कृष्टता मान्यज्ञापनार्थआरम्भः ॥ सव्यम् ॥ शुनाञ्च पतितानाञ्च श्वपचां पापरोगिणाम् ॥ बायसानां कृमीणांच शनकै र्निर्बपेद्भुवि ॥ अनेनषड्भागान्भूमौकुर्यात् । एवं यः सर्ब भूतानि ब्राह्मणो नित्यमर्च्चति । सगच्छति परं स्थानं तेजोमूर्त्तिपथर्जुना ॥ एवं सर्वेषा भूतानाम् हिं सयासत्कारं करोति यस्सपथर्जुना सरलेन मार्गेण परम्प्रकृष्टसुख स्वरूपं स्थानं प्राप्नोत्यभिप्रायः ॥ १ ॥ इति बलिवैश्य देवविधिः समाप्ता ॥

अथाह्मनु: ॥

कृत्वैतद्बलिकमैंव मतिथिम्पूर्वमाशयेत् । भिक्षांच भिक्षवेदद्या द्विधिवद्ब्रह्मचारिणे। १॥ गृहस्थःएवं अमुना प्रकारेण बलिवैश्वदेवं कर्म कृत्वा अतिथिं पूर्वं प्रथमं विधि वत्सत्कृत्य भोजयेत् ॥ तथैवब्रह्मचारिणेविद्यार्थिने भिक्षां ग्रहीतुमागताय सत्कृत्य प्रीत्यान्नन्दद्यात् ॥ १ ॥यत्पुण्यफलमाप्नोति गान्दत्वाविधिवद्गुरोः ॥ तत्पुण्यफलमाप्नोति भिक्षांदत्वाद्विजोगृही ॥ २ ॥ यादृशस्सत्कारोगुरोः कर्त्तव्यस्तादृशएवातिथेश्च ॥ अतिथेस्सेवयातस्यसंगेनच गुरुवद्ज्ञान प्राप्तिर्भवति प्रश्नोत्तर करणे नातोतिथिसेवा सर्वैः कार्य्येति ॥ २ ॥ भिक्षांवाप्युदपात्रं वा सत्कृत्य विधि पूर्वकम् ॥ वेदतत्वार्थविदुषे ब्राह्मणायोपपादयेत् ॥३ ॥ ईदृग्लक्षणोऽतिथि र्ग्राह्यो वेदतत्वार्थ विद्वान् अर्थात् वेदशास्त्रवित् वेदस्ययस्तत्वार्थ ईश्वरबोधस्तमपियथा वद्यो जानाति धर्मात्मासन् तस्मै ब्रह्मविदेसत्कृत्यविधि पूर्वकं भिक्षाम्भोजनार्थमन्नं उदपात्रं जलपात्र मन्यद्वस्त्रादिकं वा गृहस्थोदद्यादेव ॥ ३ ॥ नश्यन्ति हव्य कव्यानि नराणामविजानताम् ॥ भस्मीभूतेषु विप्रेषुमोहाद्दत्तानिदातृभिः ॥ ४ ॥दातृभिर्गृहस्थैर्भस्मीभूतेषुविद्याविज्ञान शून्येषु धर्मानुष्ठानरहितेषु प्रमादिष्वतिथिषुमोहादज्ञानात् हव्यकव्यानि देवपित्रर्थ संस्कृतान्यन्नानिदत्तानि तानितेषामविजानतां विवेकशून्यानां नराणां गृहस्थानां नश्यन्तिनष्टानिनिरर्थकानिभवन्तीतिवेद्यम् अतस्तादृशानान्दुष्टानामतिथीनां सत्कारोनैवकार्य इत्यभिप्रायः ॥४॥

विद्यातपः समृद्धेषु हुतंविप्रमुखाग्निषु। निस्तारयति दु-र्गाच्च महतश्चैवकिल्विषात् ॥ ५ ॥ किंत्वीदृशानामतिथी-नां गृहस्थैः सेवाकार्या कीदृशानां ॥ तद्यथा ॥ विद्यातपःस-मृद्धेषु॥विद्यापृथिवीमारभ्येश्वरपर्य्यन्तानांपदार्थानांयथा वत्ववविज्ञानं, तपश्चन्यायपक्षपातरहितोयोधर्मइंद्रियाणां वि जयश्चतयोरनुष्ठानेन प्राप्त्याच ताभ्यां सम्यग्वृद्धावृ-द्धा स्तेषु ॥ कथंभूतेषु विप्रमुखाग्निषु विप्राणां विदुषांमु-खानीवअग्निवत्प्रज्वलितानि विद्ययाप्रकाशितानियेषांते वि प्रमुखाग्नयस्तेषुविप्रमुखाग्निष्वनुत्तमेषुधर्मात्मसु स-र्वोपकारकेष्वतिथिषु यद्धुतं अर्थात् तेभ्यः श्रद्धया दत्तं च महतः किल्विषात् तान्दातृगृहस्थान् निस्तारयत्युद्धर-ति तेषां प्रसंगेन नराणां यद्विज्ञानम्भवति तद्विद्यान्ध कारदुःखसागरादुद्धृत्य व्यावहारिकं पारमार्थिकञ्चा-नन्दम् प्रापयतीत्यभिप्रायः ॥ ५ ॥ सम्प्राप्तायत्वतिथये प्रदद्यादासनोदके ॥ अन्नञ्चैव यथाशक्ति सत्कृत्यविधि पूर्वकम् ॥ ६ ॥गृहस्थः सम्यक्प्राप्ताय अतिथयेप्रत्युत्था-ननमस्कारादिकंकृत्वा विधिपूर्वकं सत्कृत्यपुनरासनमुद-कञ्च प्रदद्यात्तथैव यथा शक्त्यन्नञ्च ॥ ६ ॥ तृणानिभूमि रुदकंवाक्चतुर्थीचसूनृता ॥ एतान्यपिसतांगेहे नोच्छि-द्यन्ते कदाचन ॥ ७ ॥ सतांसत्पुरुषाणां गृहस्थानां गेहे एतानि अपिशब्दादन्यच्च कदाचन नोच्छिद्यन्ते नष्टानि न्यूनान्यदेयानि वा कदाचिन्नभवन्ति ॥ कानितानीत्याह तृणानिघासादीनि भूमिर्निवासस्थानं। उदकंजलदुग्धा-दिकंमधुबाणीसूनृताअन्नञ्चेति गृहस्थास्सदैवैतान्यतिथि

भ्योददतीत्यभिप्रायः ॥ ७ ॥ एकरात्रंतुनिवसन्ना तिथि-
र्ब्राह्मणःस्मृतः ॥ अनित्यंहिस्थितोयस्मा त्तस्माददतिथि
रुच्यते ॥ ८ ॥ कीदृशोजनोऽतिथिर्भवतीत्याह ॥ एकरात्रं
एकरात्रपर्य्यन्तं निवासं कुर्य्यात्सोतिथिः स्मृतो भवति
कथम्भूतः । सः । शमादिगुणवान्विद्येश्वरविज्ञनान्यः ।
पूज्योभवति अन्यस्त्वापत्कालवान्प्राणात्यये समये अन्न
जलादिदातुंयोग्यो भवति ॥ अतिथेः किं लक्षणमित्याह ॥
यस्मादेकत्र नित्यं स्थितो न भवति तस्मात्कारणात्सोऽ
तिथि रुच्यते अविद्यमानाह्यनियता तिथिर्दिवसो यस्य
सो तिथि र्नान्यः ॥ ८ ॥ नैकग्रामीणमतिथिं विप्रं सां-
गतिकं तथा ॥ उपस्थितं गृहेविद्या द्भार्य्यामत्राग्नयोपि
वा ॥ ६ ॥ गृहस्थागृहेयत्र भार्य्यायत्राग्नयः । अग्निहो-
त्रस्थानम्पाकशालांवा तत्रापि एकग्रामीणमेकस्मिन्ग्रामे
निवासशीलंकुटीम्मठम्वारचयित्वा तत्रैकत्रनिवसन्तंत-
था सांगतिकं संगत्याधनम्प्रतिष्ठां सत्कारञ्चेच्छन्तं तत्रा
प्युपस्थितं अतिथिं नविद्यान्नैव जानीयात् ईदृशोतिथिर्गृह-
स्थेन सत्कर्त्तव्योनैवभवतीत्यभिप्रायः॥ सांगतिकंसततम्
प्रियवाद्युच्यते॥ यश्चयथार्थान्गुणान्दोषांश्च सम्मुखे स-
मक्षे कथयतितस्यैवसङ्गेन जनानांसुखलाभोभवतिनान्य-
था ॥ अत्राह विदुरोधृतराष्ट्रम्प्रतिमहाभारते ॥ पुरुषाबह-
वोराजन्सततम्प्रियवादिनः ॥ अप्रियस्यचपथ्यस्य वक्ता
श्रोताचदुर्लभः ॥ १ ॥ हे राजन्धृतराष्ट्र । सततम्प्रिय-
वादिनः श्रेष्ठा श्रेष्ठाचारिणामनुकूलकर्त्तारः । पुरुषाअ-
स्मिंल्लोके बहवस्सन्ति किन्तु श्रवणेह्यप्रियम्वचनम्भवेत्प-

रन्तुतद्भवेत्पथ्यंनामकल्याणकारकन्तस्यवक्तापुरुषःदुर्ल-भोदुःखेन महाभाग्येन लभ्यो भवति तथैव श्रोताच ईदृशा अतिथयो गुरव उपदेष्टारश्च श्रेष्ठा भवन्तीत्यभिप्रायः॥ ९ ॥ उपासतेये गृहस्थाः परपाकमबुद्धयः॥ तेन ते प्रेत्य पशुतां व्रजन्त्यन्नादिदायिनाम् ॥ १० ॥ येगृहस्थाभूत्वापरगृहेपक्कमन्नम्पुण्यार्थमतिथिवद्भोक्तुमिच्छन्ति तेऽबुद्धयस्सन्तीतिवेद्यम् ॥ किन्तुयाजनाध्यापकाभ्यामित्रतया च भोजनान्नग्रहणे दोषो नास्ति यदितेतिथिवत्परान्नम्भोक्तु मिच्छन्त स्सन्तःपरगृहमुपासते तेनहेतुना दोषेणप्रेत्य मरणम् प्राप्य अन्नादि दायिनामन्न दातॄणाम्पशुताम्व्रजन्ति प्राप्नुवन्तीत्यभिप्रायः अर्थाद्गृहस्थेनान्येभ्योतिथिभ्योन्नादिकंदातुमधिकारः। नचान्येभ्यो ग्रहीतुमिति ॥ १० ॥ अप्रणोद्योतिथिः सायंसूर्य्योढोगृहमेधिनाम् ॥ कालेप्राप्तस्त्वकालेवानास्यानश्नन्गृहे वसेत् ॥ ११ ॥ अस्यगृहस्थस्य अप्रणोद्योप्रेरितोतिथिः सूर्य्योढोदिवसे यत्र कुत्र निवसन्सायंकालेप्राप्तः अकाले रात्रौ वा अनश्नन्भोजनमकुर्वन्सन्गृहे न निवसेत् अर्थात् अन्नजलादि दानेन गृहस्थेनावश्यं सोतिथिस्सत्कर्तव्यइत्यभिप्रायः॥ ११ ॥ नैवस्वयंतदश्नीयादतिथिंयन्नभोजयेत् ॥ धन्यंयशस्यमायुष्यं स्वर्ग्यञ्चातिथिपूजनम् ॥ १२ ॥ गृहस्थोयदन्नमतिथिं न भोजयेत्तदन्नंस्वयं नैवाश्नीयान्नैवभुंजीत किन्तुयद्यत्स्वयंभुंजीततत्तदतिथये पिदद्यादेव कुतः अतिथिपूजनं धन्यंयशस्य मायुष्यंस्वर्ग्यं न्भवत्यतः॥ तद्यथा॥ पुरुषार्थोद्यमयुक्त्युपदेशेनब्यर्थ

ठ्ययः। प्रतिषेधेनच धनस्यलाभः स्थिरताच भवत्यतो
धन्यम् ॥ विद्यादिश्रेष्ठगुणग्रहणेन अविद्यादि दुष्टदोष
प्रतिषेधेनच यशस्करंभवति॥शरीरेन्द्रियवीर्य्यबुद्धिरक्षो-
पदेशेन प्रमादिव्यभिचारदुष्टाचारप्रतिषेधोपदेशेनचायु-
स्करम्भवति ॥ विद्याधर्मेश्वरोपदेशेनाविद्या अधर्म ना-
स्तिक्याप्रतिषेधयुक्तयुपदेशेनेन्द्रिय सुखकरं मोक्षकर-
ञ्चातिथिपूजनमतिथिसत्कारो भवत्यतःकारणाद् गृह-
स्थैरतिथिसत्कारोवश्यंकार्य्यएवेत्यभिप्रायः ॥ १२ ॥
आसनावसथौशय्या मनुव्रज्यामुपासनाम् ॥ उत्तमेषूत्तमं
कुर्य्याद्धीनंहीनेसमे समम् ॥ १३ ॥ सर्वेषामतिथीनां तु-
ल्यासेवागृहस्थैर्नैवकार्य्या तेषामयथार्थत्वात्तदयोग्यत्वा-
च्च ॥ कासेवेत्यत्राह। आसनंआवसथो निवासार्थं स्थानम्
अनुव्रज्यागच्छतोनुगममुपासनांच अर्थात्समीपेस्थित्वा
प्रश्नोत्तरकरणमेतदुत्तमगुणेषूत्तमम् कुर्य्यात् समगुणेषु
समम्मध्यगुणेषुमध्यमं न्यूनगुणेषुन्यूनञ्च ॥ किन्तुयादृ-
शीयस्य विद्याश्रेष्ठगुणाः शीलञ्च तादृश एवसत्कारः कर्त्त-
व्यो नान्यथा ॥१३॥सुवासिनीं कुमारींञ्च रोगिणीं गर्भि-
णींस्त्रियः। अतिथिभ्योग्रएवैताभोजयेदविचारयन्॥१४॥
सुवासिनीसद्योविवाहिता। कुमारीबाल्यविवाहिता यारो-
गयुक्तायाचगर्भवती॥ नयेदृशापुरुषाश्च। अतिथिभ्यअग्रे
पूर्वमेवभोजनेनात्रकार्य्याविचारणा ॥ १४॥ भुक्तवत्स्व-
थविप्रेषुस्वेषुभृत्येषुचैवहि ॥ भुंजीयातान्ततःपश्चादवशि-
ष्टन्तुदम्पती ॥ १५ ॥ विप्रेष्वतिथिषु भुक्तवत्सु कृतभोज-
नेषुस्वेषुभृत्येषुभरणीयेषु पुत्रादिषु कर्म्मकरेषु चभुक्तवत्स

अर्थत्यनन्तरं तत्पश्चादवशिष्टंशेषान्नं दम्पतीमुख्यौस्त्री पुरुषौभुंजीयातांभोजनंकुर्य्यातामयमेवगृहस्थस्य परमो धर्म्मः ॥ १५ ॥ अघंतुकेवलंभुंक्ते यःपचत्यात्मकारणात् । यज्ञशिष्टाशनंह्येतत्सतामन्नम्विधीयते ॥ १६ ॥ योगृहस्थः बलिवैश्यदेवमतिथिसेवाम्पुत्रभृत्यादिसत्कारमकृत्वा स्व-भोजनार्थमेव पचतिपाकंकरोति सः अन्नादिकं नभुङ्क्ते किन्त्वघंपापमेवभुंक्ते यत्तुयज्ञशिष्टाशनमर्थात् होमकरणा-तिथ्यादि भुक्तशेषमन्नम्भवति तत्सत्पुरुषाणामन्नम्भवत्य-तोविपरीतमन्नमसत्पुरुषाणाम्भवतीतिवेदितव्यम्॥१६॥ एतेमनुस्मृतेस्तृतीयाध्यायस्थाःश्लोकाःसन्तीतिवेद्यम् ॥ एवम्प्रकारेणैतल्लक्षणानतिथीनवश्यंसत्कुर्य्याद्गृहस्थोना-न्यान्धूर्त्तान्पाखंडिनः ॥ इत्यतिथिपूजनविधिस्समाप्तः ॥

अथ लक्ष्मीसूक्तमृग्वेदस्थं लिख्यते तदर्थश्च ॥

धनादिलक्षणालङ्कारेणश्रीदःपरमात्मा स्तूयते ॥ लक्ष्म्यादिसुखकामोजन एवंस्तुवीत ॥

"ओम्हिरण्यवर्णांहरिणीं सुवर्णरजतस्रजाम्।चन्द्रां हिरण्मयीं लक्ष्मींजातवेदोममावह" ॥ १ ॥ जातवेदाःसर्वज्ञंशास्त्रंयस्माज्जातानि वस्तूनिसर्वाणिवेत्ति जानातिविन्दति प्राप्नोति सस्वत्सम्बुद्धौ हेजातवेदःपरमेश्वर ॥ लक्ष्मींममसमीपेआवह आसमन्तात्प्रापयदेहीत्यर्थः ॥ कथम्भूतांताम् ॥ हिरण्यवर्णाम् ॥ हिरण्यस्यसुवर्णस्य वर्णइववर्णो यस्यास्तांहिरण्मयीम्॥दर्शनमात्रेणैव जनानाञ्चित्तंहर्त्तुंशीलंयस्यास्ताम्॥सुवर्णरजतस्रजाम् ॥ सुवर्णस्यरजतस्यचस्रक्मालाप्राप्यतेयस्यांताम् ॥ चन्द्राम्

आह्लादकर्त्रीम् ॥ हिरण्मयीम् ॥ हिरण्यंप्रकृतंप्रभूत मधिकंयस्यांतामीदृशींलक्ष्मीं हे ईश्वर नोदेहीत्येतदर्थंभवान्प्रार्थ्यतेस्माभिः ॥ १ ॥ "ताम्मआवहजातवेदोलक्ष्मी मनपगामिनीम् ॥ यस्यांहिरण्यंविन्देयंगामश्वम्पुरुपानहम्"॥ २ ॥ हेजातवेदः परमात्मन् ॥ तांलक्ष्मींमिमांप्रापय मह्यन्देहि ॥ कथम्भूताम् ॥ अनपगामिनीम् ॥ अपदूरङ्गन्तुंशीलंयस्याःसा अपगामिनीनअपगामिनी अनपगामिनी भवत्कृपया मत्समीपेस्थिराभवेत्ताम् । यस्यांभवदनुग्रहेण प्राप्तायांलक्ष्म्यामधिकंहिरण्यंकाञ्चनसुवर्ण महम्विन्देयम्प्राप्नुयाम् ॥ तथैवगांपृथिवीं दुग्धदात्रींवा ॥ श्रेष्ठमश्वमश्वांजात्यभिप्रायादेकवचनम् पुरुपांश्चोत्तमान्भवद्दत्तान्विन्देयम् ॥ एतत्सर्वंसद्योहम्प्राप्नुयामेतदर्था भवत्प्रार्थनाक्रियतेस्माभिः ॥ २ ॥ "अश्वपूर्णांरथमध्यां हस्तिनादप्रमोदिनीम् ॥ श्रियन्देवीमुपह्वये श्रीर्मादेवीजुंषताम्"॥ ३ ॥ हे जातवेदईश्वर मदर्थम्भवत्प्रेरितांश्रियं ममसमीपमागच्छन्तीमहमुपह्वये ॥ साचभवदाज्ञयामां जुषतांसेवतांमांविहाय इतस्ततःसमागच्छतु ॥ किन्तु स्थिरासती ममसमीपेसदैवतिष्ठत्वित्यभिप्रायः कथम्भूतां तांश्रियम् ॥ अश्वपूर्णाम् ॥ अश्वैःपूर्णाअश्वपूर्णाताम् ॥ रथारमणीयामध्येयस्यान्ताम् ॥ हस्तिनांनादाहस्तिनादास्तैः प्रमोदयितुंशीलंयस्यास्तांराजश्रियंभवत्कृपा कटाक्षप्रापितामुपह्वयेसदैवरक्षयामीत्यर्थः ॥ ३ ॥ "कांसो स्मितांहिरण्यप्राकारामार्द्रांज्वलन्तीन्तृप्तान्तर्पयन्तीम् । पद्मेस्थिताम्पद्मवर्णा न्तामिहोपह्वये श्रियम्" ॥ ४ ॥ हे

जातवेदईश्वर ताम्पूर्वोक्तांभवद्दत्तां श्रियमुपह्वये समीपे रुपह्वयामि ॥ पुनःकीदृशीम् ॥ कांसोस्मिताम् कांसवातु रिवउइतिवितर्केस्मितंकिंचिद्धसनशोभांसंपन्नांयस्यांताम् हिरण्यं सुवर्णं प्राकारे नगरा वरणेयस्यांताम् ॥ आर्द्रा स्नेहयुक्ताम् ॥ ज्वलन्तीन्देदीप्यमानाम् ॥ तृप्तामानन्देन पूर्णकामाम्प्रसन्नाम् ॥ तर्पयन्तीमानन्देन नः सदा सुख-यन्तीम्पद्मेस्थिताम्पद्मासनेविराजमानां शोभारूपाम् ॥ पद्मवर्णापद्मरूपवर्णा इववर्णायस्यादर्शनीयांदर्शनप्रियां चक्रवर्त्तिराजश्रियं भवत्कृपयाहम्प्राप्नुयामिहास्मिन्नेव समयेचेत्यभिप्रायः॥४॥ "चन्द्राम्प्रभासांयशसा ज्वलन्तीं श्रियंल्लोके देवजुष्टामुदाराम् ॥ ताम्पद्मनेमिं शरणं मह-म्प्रपद्ये अलक्ष्मीर्मे नश्यतान्त्वाम्वृणोमि" ॥ ५ ॥ हेजात-वेद ईश्वर भवदुत्पादितांश्रियमहम्प्राप्नुयाम् ॥ कथम्भू-ताम् ॥ चन्द्राम् ॥ विद्याविज्ञानेनाह्लादां ॥ यशसापु-ण्यकीर्त्या ज्वलन्तीन्देदीप्यमानां सर्वलोकप्रसिद्धाम् । यास्मिंल्लोकेसंसारेदेवजुष्टांदेवैर्ब्रह्मादिभि मरीच्याद्यृषि-भिर्मनुष्यादिभि र्विद्वद्भि श्चक्रवर्ति मन्वादिभी राजभि-श्चजुष्टाम्प्रीत्यासेविताम् ॥ उदारामुदारशीलामसं-ख्यातदानकर्त्रीम् ॥ पद्मानीवरथानांनेमयश्चक्राणिशोभा-रूपाणि यस्यांताम्पद्मनेमिं त्वांहेलक्ष्म्यहं शरणमाश्रय-म्प्रपद्ये ॥ त्वत्प्राप्त्यामेममअलक्ष्मीर्दरिद्रादुःखरूपा न-श्यतां नष्टाअदृश्याभवतु ॥ एतदर्थंत्वामहम्वृणोमि ॥ अ-चेतनेपिचेतनवदुपचाराददोषः॥ यद्वा हेजातवेद ईश्वर त्वा-महं शरणमहम्प्रपद्ये प्राप्नुयामाश्रयंत्वामेव वृणोमि स्वी

करोमि ॥ कस्मैप्रयोजनाय पूर्वोक्तांश्रियंभवत्कृपयाहम्प्र-
पद्ये तथाभवदनुग्रहेणाममालक्ष्मीस्सद्योनश्यतामित्यभि-
प्रायः ॥ ५ ॥ "आदित्यवर्णो तपसोधिजातोवनस्पतिस्तव-
वृक्षोयबिल्वः ॥ तस्यफलानितपसानुदन्तुमायान्तरा-
याश्च वाह्याश्रलक्ष्मीः" ॥ ६ ॥ हे आदित्यवर्णे चितृश-
क्ते आदित्यस्यवर्णइववर्णोयस्याःस्वयम्प्रकाशातत्सम्बुद्धौ
हेजातवेद ईश्वर तवतपसोविज्ञानमयादनन्तसामर्थ्यात्
बिल्वोवृक्षः वनस्पति संज्ञकःअधिजातःपृथिव्या उपर्य्यु-
त्पन्नः संसारवृक्षोवा तस्यफलानि तपसाआदित्यतापेन य-
थानुदन्ति तस्माद्वृक्षाज्जीर्णानि भूत्वाभूमौ पतन्ति यथाच
संसारवृक्षस्य कालेन पदार्थाजीर्णा भूत्वा नश्यन्ति तथैव
मायाकपटछलरूपा अन्तराया बिघ्नरूपाश्चवाह्या अप-
मानरूपास्त्यक्तव्या वाएतदादि लक्षणा अलक्ष्मीः हेई-
श्वर भवत्कृपादयोगुणानुदन्तुनाम मत्तो दूरीकुर्वन्तु त-
थैवच अविद्याजालस्यसत्वादयो विरोधिनः संसारस्या-
पिमत्तोनुदन्तु दूरंगच्छंत्वित्यभिप्रायः ॥ ६॥ उपैतुमान्देव
सखः कीर्तिश्चमणिनासह ॥ प्रादुर्भूतोसि राष्ट्रेस्मिन्की-
र्तिम्बृद्धिन्ददातुमे ॥ ७ ॥ देवानांदिव्य गुणवतां विदुषां
जीवानां योनित्यंसखामित्र ईश्वरोविद्यानिधिर्वा मामु-
पैतु स्वकृपया प्राप्नोतुहृदि अन्तरात्मनि प्रकाशिताभवतु ॥
मणिनासहेश्वरकृपया कीर्तिश्चमामुपैतु ॥ हे परमेश्वर
अस्मिन्राष्ट्रे अखण्डेराज्येजगति त्वम्प्रादुर्भूतोसि तथा
ममापिहृदये प्रादुर्भूतः प्रकटः प्रकाशितो भव ॥ अचेतने-
पिचेतनवदुपचाराददोषः ॥ भित्तिः पिपतिषतीति यथा

लोके हेजातवेद ईश्वर पुण्यकीर्तिम्विद्यादि गुणवृद्धिञ्च मेमह्यंकृपयाददात्वित्यस्माकं भवन्तंप्रतिप्रार्थनास्तीमा-म्भवान्स्वीकरोतु॥क्षुत्पिपासामलाञ्ज्येष्ठामलक्ष्मींनाश-याम्यहम् ॥ अभूतिमसमृद्धिञ्चसर्वान्निर्णुदमेगृहात् ॥८॥ हेजातवेद ईश्वर भवत्कृपया क्षुत्क्षुधारूपा पिपासारूपा मला मलिना अज्येष्ठा अमान्या । इमाश्चतुर्विधा अल-क्ष्मीः । अहंनाशयामि । अभूतिमनैश्वर्य्यं । असमृद्धिम् अ-नृद्धिं सुखानाम् वृद्धिं मेमगृहात् । हे जातवेद ईश्वरं तांसर्बान् त्वंनिर्णुदद्दूरन्निसारय॥ सर्ब मैश्वर्य्यं सर्ब सुख वृद्धिञ्चास्मत्प्रार्थितो भवान्ददातीत्यभिप्रायः॥८॥गन्ध-द्वारान्दुराधर्षान्नित्यपुष्टांकरीषिणीम् ॥ ईश्वरीं सर्बभू-तानान्तामिहोपह्वयेश्रियम् ॥ ९ ॥ गन्धस्सुगन्धोद्वारे यस्यास्तांगन्धद्वारां सर्बतः सुगंधिव्याप्तां दुराधर्षां दुःखेना धर्षाऽपमानं यस्यास्तां किन्तुसर्बैस्सत्कृता ॥ नित्यञ्चया पुष्टातांनित्यपुष्टां पुष्टिकर्त्रीञ्च ॥ करीषिणीम् ॥ पुरुषार्थं कर्तुं शीलंयेषां तानीषितुं शीलंयस्यास्ताम् सर्ब भूताना-मीश्वरीं सुखदात्रीम् । तामेवम्भूतांश्रियमहमुपह्वये स-मीपे सदैवरक्षयामि हे जातवेद ईश्वर तादृशीं श्रियम्म-ह्यन्ददात्वित्यभिप्रायः ॥ ९ ॥ मनसः काममाकूतिम्बाचः सत्यमशीमहिपशूनांरूपमन्नस्यमयिश्रीःश्रयतांयशः १०॥ हेजातवेद ईश्वर मनसः आकूतिं पूर्णानन्दं कामं बाचः सत्यं सत्यभाषणाख्यं ज्ञानंभवत्कृपयावयमशीमहिपशू-नामन्नस्य च रूपं प्रियरूपदर्शनान्पशूनन्नञ्च वयमशीम-हिप्राप्नुयाम ॥ तथापशूनामन्नस्य श्रीः शोभारूपा पू-

वांक्तावा मयिभवद्भक्ते श्रेयतांसेवतांनिवसताम् ॥ यशः कीर्तिश्च सदेत्यभिप्रायः ॥ १० ॥ कर्दमेन प्प्रजाभूताम- यिसंभ्रमकर्दम॥ श्रियम्बासयमेकुलेमातरम्पद्ममालिनी- म् ॥ ११ ॥ हेजातवेदः परमेश्वर तव याश्रीः प्रजाभूता- त्वयोत्पादिता सा कर्दमेन पुरुषार्थेन भवत्कृपयाच प्रा- प्यते ॥ हेकर्दम पुरुषार्थयुक्तोद्यम मयि सम्भ्रम उद्युक्तः सम्यक् प्रवृत्तो भवेश्वरकृपया परन्तु ममकेवल पुरुषा- र्थेनैव साश्रीःनप्राप्यते ॥ तस्मात्हेईश्वर तांश्रियंकृपया दृष्ट्या मेममकुले कुटुम्बे वासय स्थिरी भूतां कुरु ॥ कथम्भू- ताम् । मातृवन्मानदात्रीम् ॥ तथापद्ममालिनीम् ॥ पद्मानां मालाविद्यते यस्यांताम्पद्ममालिनीम् ॥ सर्व शो- भायुक्ताम् ॥ मह्यन्देहीत्यभिप्रायः ॥ ११ ॥ आपःसृज- न्तुस्निग्धानि चिक्लीतवसमे गृहे ॥ निच देवीम्मातरंश्रिय- म्वासयमेकुले ॥ १२ ॥ हेचिक्लीत परमेश्वर प्रेरित पु- रुषार्थ सर्वद्रव्यमापक ॥ अचेतनेपिचेतनवदुपचाराद दो- षः ॥ मे ममगृहे देवीन् द्योतनात्मिकान्देदीप्यमानाम्मा- तरं मान्यकारिणीं श्रियंनित्यं निवासय ॥ यद्वा हेचिक्ली- तेश्वर सर्वद्रव्यविनिमापक ॥ ताम्पूर्वोक्तां श्रियं ममगृहे नित्यं निवासयेत्यन्वयः ॥ हेजातवेद ईश्वर मेममआपः प्राणाःकर्माणि वा स्निग्धानि स्नेहयुक्तानि वस्तूनि भवत् कृपया सृजन्तु रचयन्तु चेतिप्रार्थितोस्माभिर्भवान्॥१२॥ आर्द्राम्पुष्करिणीम्पुष्टिं सुवर्णां हेममालिनीम् सूर्य्यां हिरण्मयींलक्ष्मींजातवेदोममावह॥१३॥हेजातवेदईश्वर आर्द्रां परस्परप्रीत्यादिस्नेहयुक्तां पुष्करिणीं पुष्करि-

णयाइवशोभा युक्ताम्। पुष्टिंपुष्टिरूपां सुवर्णां शोभनोवर्णो यस्यास्तां हेममालिनीम् ॥ हेम्नःकाञ्चनस्यमाला विद्यतेयस्यास्ताम् ॥ शोभायुक्ताम् ॥ सूर्य्याम् सूर्य्यवद् गुणैः प्रकाशस्वरूपाम् ॥ हिरण्मयीम् ॥ हिरण्य प्रचुराम् ॥ लक्ष्मीम् ॥ सुलक्षणयुक्ताम् ॥ यथोक्ताम् ॥ मम समीपे आवह आसमन्तात् प्रापयइत्यर्थः ॥ १३ ॥ आर्द्रांयः करिणीं यष्टीम्पिङ्गलाम्पद्ममालिनीम् ॥ चन्द्रां हिरण्मयीं लक्ष्मीं जातवेदो ममावह ॥१४ ॥ यःकरणीम् सुवर्णादिधातुकरणीम् ॥ यशस्करीम्वा ॥ यष्टीम् ॥रथस्य स्थानस्यवा सुवर्णस्तम्बशोभामयीम्॥ पिङ्गलाम् पीतादि शोभनवर्णयुक्ताम् यथोक्ताम्लक्ष्मीम् ॥ हेजातवेदःपरमेश्वर ममसमीपे आवह आसमन्तात् प्रापय इत्यर्थः १४ ॥ ताम्म आवह जातवेदो लक्ष्मीमनपगामिनीम् ॥ यस्यांहिरण्यम् प्रभूतङ्गावोदास्यो श्वान्विन्देयम्पुरुषानहम् ॥ ॥१५॥ हेजातवेदईश्वर ताम्पूर्वोक्तांलक्ष्मीम् ॥ ममसमीपमावहप्रापय महान्देहि॥ पुनःकथम्भूताम् ॥ लक्ष्मीम् ॥ सुलक्ष्याम् ॥ सुखलक्षणाम् ॥ अनपगामिनीम् ॥ सर्वतः स्थिराम् ॥ यस्यांलक्ष्म्याम्प्रभूतमधिक मत्यन्ततोलस्हितंसुवर्णकाञ्चनम् ॥ भवत्कृपयाहम्विन्देयम् ॥ प्राप्नुयाम् ॥ पुनश्चयाःश्रेष्ठगावःइन्द्रियाणि किरणाः कान्तयोवा ॥ तथानुत्तमादास्योनुकूलसेवा कर्त्र्यस्ताश्चाहंभवत्कृपयाविन्देयम् ॥ तथोत्तमानश्वान्पुरुषांश्चभवत्कृपया एतत्सर्वम्पुष्कलम्बयम् प्राप्नुयाम् ॥ भवान्नःपिता माता बन्धुर्गुरुः स्वामीच ॥ बयम्पुत्रवत्सर्वैर्भवन्तम् प्रति

सर्वमेतत्प्राप्तुंप्रार्थ्यतेतदिदंसर्वं कृपया नो देहि सद्य
इत्यभिप्रायः॥ १५ ॥ यः शुचिः प्रयतो भूत्वा जुहुयादा-
ज्यमन्वहम् ॥ श्रियः पञ्चदशर्चञ्च श्री कामः सततंजपेत्
॥ १६ ॥ योमनुष्यः शुचिः वाह्याभ्यन्तरे पवित्रसम्प्रीत्या
युक्तः परमेश्वरम्प्रार्थयन्सन्नेतैर्मंत्रै राज्यंहुतम् ॥ जुहु-
यादग्नौ प्रतिदिनम्परमेश्वरम्प्रार्थयेत् तस्मैपूर्वोक्ता ल-
क्ष्मीः प्राप्ता भवेदेव ॥ यद्वा श्रियः लक्ष्म्याः पञ्चदशर्चम् ॥
पञ्चदशमंत्रात्मकंसूक्तंयःसम्यक्भक्त्यासततंजपेत्। नामा
नेनेश्वरम् प्रतिदिनंप्रार्थयेत् सोपीश्वरानुग्रहेण लक्ष्मीम्
प्राप्नुयात् ॥ १७ ॥ इतिलक्ष्मीसूक्तार्थःसमाप्तः ॥

इतिश्रीमद्दयानन्दसरस्वती स्वामिसंगृहीतेसन्ध्यो-
पासनादिपञ्चमहायज्ञविधिप्रचतुर्वेदो-
क्तोचस्यमंत्राणामर्थप्रचसंपूर्णः ॥

अथवैष्णवी संध्या॥

शुद्ध भूमि पै आसन बिछाय चन्दन अक्षत से पृथ्वी
को पूजै ॥ ओं पृं पृथिव्यैनमः ॥ इस मंत्रसे पुनः आसन
पै बैठै बिभूति चन्दनादि धारणकरि शिखाबाँधै इसमंत्र
से "ओंब्रह्मग्रंथिसहस्त्राणि रुद्रशूलशतानिच। विष्णोर्ना-
मसहस्त्रेण शिखाबंधंकरोम्यहम्"॥ पुनः आचमन करै ओं
केशवायस्वाहा। ओं नारायणायस्वाहा। ओं माधवाय
स्वाहा ॥ ३ ॥ आचमन करि ओं गोविन्दविष्णूभ्यांनमः।

हस्तप्रच्छालनम्। ओं मधुसूदनत्रिविक्रमाभ्यांनमः ओष्ठ शुद्धकरै॥ओंवामनश्रीधराभ्यांनमः मुखस्पर्शकरै ओं हृषीकेशायनमः हस्तपोंछै ओं पद्मनाभायनमः पादस्पर्श करै ओं दामोदरायनमः कुशत्रयसे शिरपै जलसिंचन करै ओं सङ्कर्षणायनमः मुखस्पर्शः ओं बासुदेवायनमः दक्षिण नासिकास्पर्शः ओं प्रद्युम्नायनमः बामनासास्पर्शः ओं अनिरुद्धायनमः दक्षिण नेत्रस्पर्शः ओं पुरुषोत्तमायनमः बामनेत्र स्पर्शः ओं अधोक्षजायनमः दक्षिणकर्णस्पर्शः ओं नृसिंहायनमः बामकर्णस्पर्शः ओं अच्युतायनमः नाभिस्पर्शः ओं जनार्द्दनायनमः हृदयस्पर्शः ओंउपेन्द्रायनमः शिरस्पर्शः ओं हरयेनमः दक्षकंधास्पर्शः ओं विष्णवेनमः बामकंधास्पर्शः इनन्यासनकोकरि प्राणायामकरै। दक्षिणअंगुष्ठसेदक्ष नासाकोरोंकिवायु८ बार जप पूर्वक खैंचे अनामिका कनिष्ठिकासे बामनासाकोरोंकि ३२ ओंकार जपिधीरे२ दहिने नासा द्वारा ओं १६ बार जप सहित बायु छोड़ि बामहस्त में जललै दहिने हाथसे ढांकि हं यं रं लं वं इस मंत्रको तीन बार पढ़ि नीचे गिरि रहा जो जलहै उससे तत्वमुद्रा अर्थात् अंगुष्ठ अनामिका योग से मूल मंत्रोच्चार पूर्ब्बक ३ बार शिर सींचै शेष जल दक्षिण हस्त करि चलते स्वास द्वारा शरीरान्तर्गत आत्मा प्रच्छालित करि कृष्णवर्णजलको स्मरण करि श्वासके साथ बाहर हस्त में ल्याय आगे बज्रशिला को ध्यानकरि फट् इति मंत्रसे पटकि मलमंत्र से शुद्धजल से हाथशुद्धकरि सूर्य्यार्घ्यदेय मूलं"रविमंडल स्थाय श्रीबासुदेवायार्घ्यंकल्पयामि"इसमंत्रसे अर्घ्यं देकै

सूर्य्यमण्डलमें मूलदेवको ध्यानकरि गायत्रीजपै "ओंनारायणाय विद्महेवासुदेवायधीमहितन्नोविष्णुःप्रचोदयात्" । १० वार जपि मूलमंत्र जपै ओं अस्यश्री विष्णुद्वादशाक्षर मंत्रस्य सदा शिव ऋषि र्गायत्रीछन्दः श्रीवासुदेवोदेवता ओं बीजम् नमः शक्तिः वासुदेवाय कीलकम् ममधर्म्मार्थकाममोक्षार्थेजपेविनियोगः। ओं सदाशिवऋषयेनमः शिरःस्पर्शः गायत्रीछन्दसेनमः मुखस्पर्शः श्रीवासुदेवदेवतायैनमः हृदयस्पर्शः ओं बीजायनमः गुह्यस्पर्शः नमःशक्तये पादस्पर्शः वासुदेवाय कीलकायनमः व्यापकम् ओं नमः अंगुष्ठाभ्यांनमः भगवतेतर्ज्जनीभ्यांनमः। वासुदेवाय मध्यमाभ्यांनमः।वासुदेवायअनामिकाभ्यांनमः।भगवतेकनिष्ठिकाभ्यांनमः। ओं नमःकरतलकरपृष्ठाभ्यांनमः ओं नमःहृदयाय॥ नमःभगवते शिरसेस्वाहा। वासुदेवायशिखायैवौषट्। वासुदेवायकवचायहुं। भगवतेनेत्रत्रयायवौषट्। ओंनमःअस्त्रायफट्।अथध्यानम्॥ विष्णुंशारदकोटि चन्द्र सदृशंशंखंरथांगंगदामंभोजन्दधतंशिताब्जनिलयंकान्त्या जगन्मोहनं। आबद्धांगदहारकुण्डलमहामौलिस्फुरत्कंकणं श्रीवत्सांकमुदारकौस्तुभधरं वंदेमुनीन्द्रैःस्तुतम्। अथ मानसोपचार पूजा। लंपृथिव्यात्मकंश्रीवासुदेवाय गंधं समर्प्पयामि हंआकाशात्मकंश्रीवासुदेवायपुष्पं समर्प्पयामि यंवाय्वात्मकंश्रीवासुदेवायधूपंसमर्प्पयामि रंवन्ह्यात्मकं श्रीवासुदेवाय दीपंसमर्प्पयामि वंअमृतात्मकं श्रीवासुदेवायनैवेद्यंसमर्प्पयामि संशक्त्यात्मकं श्रीवासुदेवाय ताम्बूलंसमर्प्पयामि इतिपूजा ॥ अथजप-जपांतमें

जलहाथ में लै मंत्रपढ़ै "ओंगुह्यातिगुह्यगोप्तात्वंगृहाणा-स्मत्कृतंजपम् । सिद्धिर्भवतुमदेवत्वत्प्रसादान्महेश्वर"। यहमंत्रपढ़िध्यानकरिदेवकेदक्षहस्तमेंजलरूपजपअर्प्पण करै पुनःदेवतर्प्पणकरै (यथामूलंसांगं सबाहनंसपरिवारं श्रीबासुदेवंतर्प्पयामि १२ बार तर्प्पणकरि इष्टदेवकोसं-हारमुद्रा करिकै बिसर्ज्जनकरि तर्प्पणकरै। (अथसङ्कल्पः आचमनपूर्व्वक हरिस्मरणकरि हस्तमें जल कुशलै ओं तत्सदद्य वर्तमान अमुकमासे अमुकपक्षे अमुकतिथौ अ-मुकगोत्रोहं अमुकशर्म्मा सर्बपापोपशमनपूर्ब्बकपुण्यफल प्राप्तिकामः नित्यकर्मणिदेवमनुष्यऋषिपितृतर्प्पणमहं-करिष्येइतिसंकल्पः पूर्बाभिमुखहोके पवित्रधारणकरिप्रा-र्थनाकरि तर्प्पणकरै ओंब्रह्मादयःसुराःसर्बे ऋषयः सन-कादयः । आगच्छन्तु महाभागा ब्रह्माण्डोदरवर्त्ति नः॥ओं ब्रह्मातृप्यताम् ओंविष्णुस्तृप्यताम् ओंरुद्रस्तृप्यताम् देवायक्षास्तथानागा गंधर्बाप्सरसोऽसुराः । क्रूराःसर्प्पाः सुपर्णाश्च तरवोजंबुकाःखगाः बिद्याधाराजलाधारा स्तथै-वाकाशगामिनःनिराधाराश्चयेजीवाःपापेधर्म्मेरताश्चये ते सर्वेतृप्तिमायांतुमद्दतेनांबुनासदा ॥ ततःमालातुल्य य-ज्ञोपवीत करि सनकादिकों को तर्प्पणकरै॥ ओंसनकस्स-नंदनश्चैव तृतीयश्च सनातनः । कपिलश्चासुरिश्चैववोढुः पंचशिषेतिच ॥ तेसर्बेतृप्तिमायान्तुमद्दतेनाम्बुनासदा ॥ ततः (सब्य) अर्थात्वामकंधपैयज्ञोपवीतकरिपूर्ब्बमुखत-र्प्पणकरै ओंमरीचिरत्रिरंगिराः । पुलस्त्यःपुलहःक्रतुः ॥ प्रचेताश्चभृगुश्चैववशिष्ठोनारदोमुनिः तेसर्वेतृप्तिमायान्तु

मद्दत्तेनाम्बुनासदा ततः॥ अपसव्यहो मोटक तिलजल लै तर्प्पणकरै ओं कव्यबाड़नलादयोदिव्यपितर आगच्छंतु गृह्णान्त्वेतान्जलांजलीन् ॥ ओं कव्यबाड़नलस्सोमस् सोमपाःपितृदेवताः॥अग्निष्वात्ताःपितृगणास्तथावर्हिष-दश्चये॥यमायधर्मराजाय मृत्यवेचांतकायच। वैवस्वताय कालाय सर्वभूतक्षयायच॥औदुंबरायदध्नाय नीलायपर मेष्ठिने। वृकोदरायचित्राय चित्रगुप्तायवैनमः॥ तेसर्वेतृप्ति मायांतुमद्दतेनांबुनासदा अमुकगोत्रः अस्मत्पिता अमुकश-र्म्मावसुस्वरूपः सपत्नीकस्तृप्यतामिदंतिलोदकं तस्मै स्वधा ३ अमुकगोत्रःअस्मत्पितामहःअमुकशर्म्मारुद्रस्व-रूपस्सपत्नीकस्तृप्यता मिदंतिलोदकं तस्मैस्वधा ३ अ-मुकगोत्रःअस्मद्वृद्धप्रपितामहः अमुकशर्म्मा आदित्यस्वरू-पःसपत्नीकस्तृप्यता मिदंतिलोदकं तस्मैस्वधा ३ अमुक गोत्रःअस्मन्मातामहः अमुकशर्म्माअग्निस्वरूपस्सपत्नीकः तृप्यता मिदंतिलोदकंतस्मैस्वधा ३ अमुकगोत्रःअस्मत् प्रमातामहः अमुकशर्म्मावरुणस्वरूपः सपत्नीकःतृप्यता मिदंतिलोदकंतस्मैस्वधा३ अमुकगोत्रः अस्म वृद्धप्रमाता महः अमुकशर्म्माप्रजापतिस्वरूपः सपत्नीकस्तृप्यतामिदं तिलोदकंतस्मैस्वधा ३ येबांधवाबांधवावायेऽन्यजन्मनि बांधवाःतृप्तिमेतेखिलायांतु यश्चास्मत्तोऽभिवांछति॥गुरु स्वशुरबंधूनांयेकुलेषुसमुद्भवाः॥तेसर्वेतृप्तिमायान्तुमद्दत्ते नांबुनासदा॥इन मंत्रोंको पढ़ि वस्त्र निचोवै येचास्माकंकुले जाता अपुत्रागोत्रिणोमृताः।तेपिवंतुमयादत्तंवस्त्रनिःपीड-नोदकम् ॥ ततः सव्य होकर तर्प्पणकरै ओं भीष्मःशांतन-

वोवीरःसत्यवादीजितेन्द्रियः। आभिरद्भिरवाप्नोतिपुत्रपौ-त्रोचितांक्रियाम् वैयाघ्र्यपदगोत्राय सांकृत्यप्रवरायचअ पुत्रायददाम्येतज्जलंभीष्मायवर्म्मणे वसूनामवताराय शंतनोरात्मजायच। अपुत्रायददाम्येतज्जलंभीष्मायवर्म-णे॥भीष्मस्तृप्यतांभीष्मायनमः ततः सूर्य्यायार्घ्यन्दद्यात् एहिसूर्य्यसहस्रांशोतेजोराशेजगत्पते । अनुकंपयमांभ-क्त्यागृहाणार्घ्यंदिवाकर ततःसूर्य्यप्रार्थना ओं नमोविव-स्वतेब्रह्मन्भास्वतेविष्णुतेजसे। जगत्पवित्रेशुचयेसवित्रे कर्म्मदायिने॥ओं स्वयंभूमंत्रस्यसूर्यऋषिः सूर्य्योदेवता सू-र्य्योपस्थानेविनियोगः ओंस्वयंभूरसिश्रेष्ठोरश्मिर्वर्च्चोदा असिवर्च्चोमेदेहिअनेनदेवर्षिमनुष्य पितृतर्प्पणेनदेवर्षि मनुष्य पितृयज्ञरूपीनारायणः प्रीयतां ॥

इति तर्पणम् ॥

Date	No.	Date	No.